# Atmanathastutih Vatapurishvarakrita

# आत्मनाथस्तुतिः वातपुरीश्वरकृता

## Document Information

Text title : Atmanathastutih 3

File name : AtmanAthastutiH3.itx

Category : shiva, stuti, aShTaka

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From Atmanatha Stuti Manjari, Ed. S. V. Radhakrishna Sastri

Latest update : December 12, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2022

*sanskritdocuments.org*

Atmanathastutih Vatapurishvarakrita

# आत्मनाथस्तुतिः वातपुरीश्वरकृता

मन्दहाससुन्दरारविन्दवक्त्रशोभितं
नन्दनीयभूसुरावतारवन्दितद्विजम् ।
कुन्दकुड्मजालरम्यदन्तपङ्क्तिभासितं
कुन्दमूलमन्दिरस्थमिन्दुचूडमाश्रये ॥ १॥

कुण्डलीशकुण्डलं महाण्डकादिताण्डवं
चण्डभानुदीधितिप्रकाण्डकान्तिकुण्डलम् ।
पुण्डरीकवर्यचर्ममण्डितावलग्नकं
कुन्दमूलमन्दिरस्थमिन्दुचूडमाश्रये ॥ २॥

पुण्डरीकपूःसमृद्ध्यताण्डवं दयाकरं
खण्डितामरेन्द्रवैरिमण्डलं महाप्रभुम् ।
खण्डशीतरश्मिफालमण्डलाग्निमण्डलं
कुन्दमूलमन्दिरस्थमिन्दुचूडमाश्रये ॥ ३॥

अक्षयार्थदायकं प्रतिक्षणं क्षमापकं
रक्षितद्विजार्भकं प्रधक्षितारिलक्षकम् ।
दक्षयागशिक्षकं विचक्षणं सुरक्षकं
कुन्दमूलमन्दिरस्थमिन्दुचूडमाश्रये ॥ ४॥

कञ्जजादिदानवारिपुञ्जवन्दिताङ्घ्रिकं
भञ्जिताश्रितापदं तमञ्जसार्थदायकम् ।
मञ्जुलामृतादियुक्तिवाक्यजालरञ्जकं
कुन्दमूलमन्दिरस्थमिन्दुचूडमाश्रये ॥ ५॥

तुङ्गभङ्गराजितामराधिपाङ्गमुज्ज्वलद्
बालसोमचूडकं भुजङ्गभूषिताङ्गकम् ।
सङ्गहीनभक्तशीलपालकं जगद्गुरुं
कुन्दमूलमन्दिरस्थमिन्दुचूडमाश्रये ॥ ६॥

कालकालमम्बुजाक्षनेत्रपूजिताङ्घ्रिकं
    कालिमार्द्रकन्धरं कपालशूलधारिणम् ।
मूलकारणं जगत्प्रचालकस्य शङ्करं
    कुन्दमूलमन्दिरस्थमिन्दुचूडमाश्रये ॥ ७॥

कुन्दमूलमृत्तिकामघामयादिमर्दिनीं
    सादरं प्रधारकाः प्रभक्षकाश्च ये द्रुतम् ।
आधिपापवर्जितान्विधायकं जनांश्च तान्
    कुन्दमूलमन्दिरस्थमिन्दुचूडमाश्रये ॥ ८॥

आत्मनायकस्तवं महार्थदायकं परं
    वातपूःपतीरितं वरिष्ठवाञ्छितप्रदम् ।
भुक्तिमुक्तिकारणं पठेत्सकृच्छिवाग्रतो
    यःस एव मुक्तिभाक् शिवाधिकप्रियो भवेत् ॥ ९॥

इति श्रीवातपुरीश्वरकृता आत्मनाथस्तुतिः समाप्ता ।

Proofread by  Aruna Narayanan

Tirupperunthurai (also called the Athmanathaswamy temple) is located in Avudaiyarkoil village, near Aranthangi in the Pudukkottai district of Tamil Nadu. It was built to honor Lord Shiva. The presiding deity is formless (Atmanatar); there is no Śivalingam but only a pedestal (AvudayAr) located in the sanctum, hence the name Avudayar Koil. The God faces South in this temple- in Dakshinamurthy or Guru form. His consort is worshipped as SivayoganAyaki (YogAmbAl) in iconless form. There is no Nandi bull icon as is conventional in almost all Shiva temples.

There is deep spiritual significance in

this. Hinduism allows deity worship for the novice. As one's devotion matures, one begins to contemplate the truth of formlessness of the Brahman. The temple has been designed to illustrate this theology. This one of the rarest Saivite shrines in whole of India to portray the supreme truth symbolically. Since the soul (athma) has no form, the deity is called Athmanathar.

Legend has it that Manickavasagar, one of the four Saivite savants, constructed the temple at Avudaiyarkoil.

*Atmanathastutih Vatapurishvarakrita*
pdf was typeset on December 22, 2022

Please send corrections to *sanskrit@cheerful.com*